International Journal of Sanskrit Research 2019; 5(3): 69-71

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 69-71
© 2019 IJSR
www.anantaajournal.com
Received: 10-03-2019
Accepted: 12-04-2019

**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

**Correspondence**
**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

# संस्कृतवाङ्मये व्याकरणशास्त्रम् पाणिनीयाष्टाध्यायी सन्दर्भे

**डॉ. बहुरन सिंह पटेल**

**प्रस्तावना**

संस्कृतभाषायामुपनिबद्धानां ग्रन्थानामाकरमेवाचक्षते संस्कृतवाङ्मयम्। विश्वस्य समस्त विज्ञानं संस्कृतवाङ्मये उपलभ्यते।ज्ञानं नित्ये शाश्वतञ्चास्ति कदापि न नश्यति। सामान्यज्ञानं विशिष्ट ज्ञानञ्चैव द्विविधं ज्ञानं स्वीक्रियते। विशिष्टज्ञानमेव विज्ञानमभिधीयते। विज्ञानमपि द्विविधं– ऐहलौकिकं पारलौकिकञ्च। परञ्चाधुना विज्ञानस्यार्थं संकुच्य ऐहलौकिकं ज्ञानमेव विज्ञानस्याभिधेयं मनुते। विज्ञानं नाद्य प्रादुर्भूतं वस्तु अपित्वनादिकालादेव विद्यते। विज्ञानं परिवर्तनशीलं नास्ति। अधुनावाप्तज्ञानं प्रसारयितुं यां भाषामवलम्बते सा तस्य न भवितुं शक्यते। ज्ञानं तु भाषामाध्यमेन सर्वत्र प्रसरति । वर्तमाने यस्य कस्यचिद्वस्तुनः ज्ञानं सम्प्राप्यते ततः प्राक् तज्ज्ञानं नासीदिति मैवम्। ज्ञानं तु भूतकालेऽप्यासीत् वर्तमानेऽपि विद्यते भविष्येऽपि भविष्यति। भाषा परिवर्तन्ते प्रयोक्तारश्च परिवर्तन्ते परञ्च ज्ञानमपरिवर्तनीयं भवति।

जगति व्यवहारनिर्वहणाय भाषैव प्रधानभावं जुषते। अन्तरेण भाषां लोका नैजमाशयं
प्रकाशयितुं समर्था न भवन्ति। अपरं च भाषयाऽपिसुसंस्कृतया भवितव्यम्। तथैव च सुसंस्कृता भाषा शब्दसाधुत्वमपेक्षते। साधुशब्दप्रयोगे हि व्याकरणाध्ययनं प्रधानं प्रयोजकम्। प्रधाने च कृतो यत्नः फलवान् भवति। अत एव वाक्यपदीये भर्तृहरिरप्याह–

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टनामिदं स्मृतिनिबन्धनम्।।[1]

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद् व्याकरणम्' इति व्युत्पत्तिमाश्रित्य व्याकरणं शब्दशास्त्रं नाम। प्रकृतिप्रत्ययोः ध्वनिस्फोटयोः शब्दापशब्दयोः शब्दनित्यानित्ययोः पदवाक्ययोः पदपदार्थयोः वाक्यवाक्यार्थयोः विवेचनं विश्लेशषणं च व्याकरणस्यप्रयोजकत्वेना– स्थीयते।

वेदानां रक्षार्थं ऊहार्थम् अर्थात यथास्थानम् उचितशब्दप्रयोगार्थं शास्त्राज्ञापालनार्थं लघ्वर्थमसन्देहार्थं च व्याकरणाध्ययनमनिवार्यम्। उक्तञ्च–ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयोज्ञेयश्च। प्रधानं च षडंगेषु व्याकरणम् [2]

यजुर्वेदे ऋद्ध;;'दृष्ट्वा रुपे व्याकरोत् सत्यानृते प्रजापतिः' [3] इति मन्त्रेण सत्यासत्य–विवेचनमपि व्याकरणरूाब्देन समर्थ्यते। महाकवेर्दण्डिनः सत्यमिदं वचनम्–
इदमन्धन्तमः कृत्ज्ञनं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। [4]

स्वरवर्णोच्चारणज्ञानमन्तरेण श्ब्दस्यार्थबोधनस्थाने अनर्थबोधकत्वं स्यात् यथा–

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुञ्तो न तमर्थमाहं।
स वागवज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।। [5]
व्याकरणस्य प्राचीनत्वम्–चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे [6] ओंकारं पृच्छामः को धातुः किं पीतिपदिकं किं नामाख्यातं [7] तस्मात् षड् विभक्तयः [8]

इत्थं वैदिककालादारभ्य व्याकरणस्यशास्त्रस्याविर्भावः प्राप्यते। व्याकरणस्य भेदद्वयम्–

सच्छान्दसं लौकिकमात्रञ्च। तत्र सच्छान्दसं पाणिनीयं लौकिकमां कातन्त्रादि। [9]

म्प्रत्यपि अष्टादशाधिका व्याकरणपरम्परा प्रवर्तिता दृश्यते। तेष्वपि प्राधान्येन अष्टौ वा नवैव गृहिताः सन्ति शेषास्तु तत्सम्बद्धा एव यथा–

इन्द्रश्चन्द्रः काशकृत्स्नः पिप्पली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयत्यष्टौ हि शाब्दिका।। [10]

पाणिनिं केन्द्रबिन्दु स्वीकृत्य व्याकरणप्रवचनपरम्परां त्रिधा विभज्यते–पाणिनिपूर्ववर्तिनी पाणि–
न्यनुगा पाणिन्युत्तरवर्तिनी च। पाणिनिपूर्ववर्तिपरम्परायामपि भेदद्वयम्–पाणिन्यस्मृताचार्याः–
महेश्वरः, बृहस्पतिः, इन्द्रः,वायुः,भरद्वाजः,भागुरिः,पौष्करसादि ,चारायणः काशकृत्स्नः,वैयाघ्रपादःमाध्यनि, रौढिः,शौनकिः गौतमः,प्रभृतीनामुल्लेखः प्राप्यते
पाणिनिस्मृताचार्येषु आपिशलिः [11], काश्यपःगार्ग्यः [12], गालवः [13], चाक्रवर्मण, [14] भारद्वाजः [15], शाकटायनः [16] शाकल्य [17], सेनकः [18], स्फोटायनः, [19] इम्येतेषां नामानि स्मर्यन्ते।
पणिनिर्हि भगवान् सर्वाणि प्रचलितव्याकरणशास्त्राणि समालोच्य विशदमपि शब्दप्रयोगविषयमुपसमाहृत्य व्याकरणसूत्राणि प्रणिनाय यत्र नियिालमेव सप्रपञ्चं शब्दानुशा–
सनमात्मसाद्भूतमस्ति। सूत्राणां सुबोध्यता विषयस्यक्रमबद्धता प्रस्तुतीकरणस्य वैज्ञानिकता विशेषतयास्वन्यतमाः। अत्रावलम्बिताः प्रत्याहारव्यवस्था संज्ञाव्यवस्था अनुवुत्तिव्यवस्था विषयस्य यथासंभव सामान्यीकरणव्यवस्था च पाणिनीयसूत्राणां महनीयताप्रतिपादकाः।
पाणिनीयव्याकरणे सूत्राणां षड्विधा व्यवस्था कृताऽस्ति। उक्तमेव–

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।

सम् उपसर्ग योगे ज्ञा धातोःअङ् प्रत्ययेन संज्ञा शब्दः निष्पद्यते। संज्ञायतेऽनेनेति संज्ञा। संज्ञा विधाने प्राप्यते– अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः [20] आवर्तिन्यः संज्ञा भवन्ति पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा यया प्रत्यायन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिनः।
पारिभाषिकरुपेण संज्ञा शब्दः अष्टाध्याय्यां चतुर्षु सूत्रेषु प्रयुक्तः स्वं रुपं शब्दस्याशब्दसंज्ञा [21]
आकडारादेका संज्ञा [22] वचोऽशब्दसंज्ञायां [23]
अभिनिसःस्तनःशब्दसंज्ञायाम् [24] अन्सरिमन्नर्थे 77
सप्तसप्तति वारं प्रयुक्तः। अत्र वृद्धिरादैच् अदेङ्गुणः सदृशाः शब्दसंज्ञाः प्रयुक्ताः येन शब्दसंज्ञायां शब्दस्य संप्रत्ययो भवति। न वेति विभाषा पा अ 1/1/44 सदृशाः अर्थसंज्ञा अपि प्राप्यते यस्मिन् विषये भाष्यकारः कथयन्ति– नवेति विभाषायामथग्स्य संज्ञा कर्तव्या न वा शब्दस्य योऽथस्तस्य संज्ञा भवतीति वक्तव्यम्। अपि च उच्चैरुदात्तःनीचैरुदात्तः समाहारः
स्वरितः एतानि त्रीणि सूत्राणि धर्मसंज्ञा सम्बद्धा सूत्राणि सन्ति। अत्र एकनवति 91 संज्ञा–
सूत्राणि प्राप्यन्ते [25]। संज्ञाविषये "उभयगतिरिह भवति" अपि च The samjna or technical
Terms of Panini are divided by patanjali in to two classes krtrima or artificial and akrtrima or natural [26] इति भेदद्वयं प्राप्यते।
परितः सर्वतः भाष्यन्ते नियमा याभिस्ताः परिभाषा एतानि सूत्राणि स्वयं तु किमपि कार्यं
कुर्वन्ति परं अन्य विधिसूत्राणां निषेधसूत्राणां वा सहायतां कुर्वन्ति। व्याकरणशास्त्रे परिभाषा–
सूत्राणां भेदद्वयम्–पाणिन्युच्चरित परिभाषासूत्राणि यथा "तस्मिन्निति निर्दिष्टे पूर्वस्य" [27] अन्यच्च परिभाषेन्दुशेखरसदृशग्रन्थेषु उपलभ्यते यथा– निर्दिश्यमानस्यादेशाः भवन्ति। [28]
परिभाषायामपि कार्यकालपक्षस्था परिभाषा कयापि दृष्ट्या असिद्धं न भवति। तथा च यथा–
द्देशपक्षस्य परिभाषा असिद्धप्रकरणे न प्रवर्तते। [29] नियम्यते निश्चीयते प्रयोगाः यैस्ते नियमाः।

स्वदेशेवाक्यार्थबोध शून्यत्वे सति परदेशे वाक्यार्थबोधकत्वमधिकारम्। अधिकारसूत्राणां विभाजनं एवं कर्तुं शक्यते–

1 एकपादधिकारः – अनभिहिते 2/3/1 तः 2/3/73 पर्यन्तम्
2 द्विपादधिकारः – प्राक्कडारारात् समासः 2/1/3 तः 2/2/38 पर्यन्तम्
3 त्रिपादधिकारः – आकडारादेकस संज्ञा 1/4/1 तः 2/2/38 पर्यन्तम्
4 चतुष्पादधिकारः – अलुगुत्तरपदे
5 पञ्चपादधिकारः – अङ्गस्य 6/4/1 तः 7/4/97 पर्यन्तम्
6 सार्धद्विपादधिकारः– प्राग्दीव्यतोऽण 4/1/83 तः 4/3/168 पर्यन्तम्
7 अष्टपादधिकारः – ङ्याप्प्रातिपदिकात् 4/1/1 तः 5/4/160 पर्यन्तम्
8 अध्यायत्रयात्मकं – प्रत्ययः3/1/1 तः 5/4/160

अन्यधर्मस्यस्यान्यस्मिन्नारोपणमतिदेशः। तेन सादृश्यग्राहकशास्त्रमेव अतिदेशसूत्रम्।
एतेषां सूत्राणामधोलिखितरुपेण कर्तुं शक्यते–

1 निमित्तातिदेश–पूर्ववत्सनः अष्टा 1/3/62
2 व्यपदेशातिदेश–आद्यन्देकस्मिन् अष्टा 1/1/62
3 तादात्म्यातिदेश –सुबामन्त्रितेपराङ्गवत्स्वरे
4 शास्त्रातिदेश – कालेभ्यो भववत् अष्टा 4/2/34
5 कार्यातिदेश – स्थनिदादेशोऽनल्विधौ पा सू 1/1/65
6 रुपातिदेश – तृज्वत्क्रोष्टुः पा सू 7/1/95
7 अथातिदेश – स्त्रियाःपुंवद्भाषितपुंस्कादनूङ् [30]

यो विधियते स विधिर्विधानं । विधिरत्यन्तमप्राप्तेः [31] संज्ञा सूत्रस्य वैशिष्ट्यमस्मि यत् तत्सूत्रं विधिसूत्रस्य अङ्गं भवितुं न शक्नोति परं परिचयो एव कारयति यदा परिभाषासूत्रं विधिसूत्रेण सह युज्यते तदा तत् सूत्रस्याङ्गं भवति।

1 समासे विधिसूत्रम्–अव्ययं विभक्ति– पा सू 2/2/6
2 कृदन्ते विधिसूत्रम् तव्यत्त्व्यानीयरः पा सू 3/1/96
3 तद्धिते विधिसूत्रम्–स्त्रीभ्यो ढक् [32]
4 लोपविधायकं विधिसूत्रम्–अतो लोपः 6/4/48
5 आगमविधायकं विधिसूत्रम् –छे च [33]

अपि च पूर्वापरनित्यान्तरङापवादानामुत्तरोत्तरं बलीयः [34] परिभाषानुसारं पदानां सिद्धिर्भवति।
तत्र नित्यानित्यविधिवशात् अतो भिस् ऐस् 7/1/9 तथा च बहुवचने झल्येत् 7/3/103 नित्यत्वात् ऐसादेशः प्रवर्तते। अपि च अन्तरङगबहिरङ्गविधिबलेन पदानांसिद्धिर्भवति।

अष्टाध्याय्यां लघुत्वादेव तदन्तविधि–तसौ मत्वर्थे 1/4/19 तदादिविधि–त्यदादीनि च
1/4/74 अर्थनिर्देशविधि गणनिर्देशविधि–सर्वादीनि सर्वनामानि 1/1/27अनुवृत्ति अधिकार
प्रश्लिष्टनिर्देश स्यतासि लृलुटोः 3/1/33 लृ =लृट् लृङ।
अनुवृत्तिविज्ञान–अत्र अनुवृत्तीनां विभाजनमीदृशमवलोक्यते–

1 अधिकाराणमनुवृत्तिः कारके–1/4/23–1/4/55
2 मण्डुकप्लुति अनुवृत्ति –अजाद्यतष्टाप् 4/1/4 इत्यस्य अत अनुवृत्ति भवति अतएव प्रथमवयोवाचकपदे कुमारी पदं सिद्धयति परं प्रथमवयोवाचक सत्यपि कन्या इत्यत्र अदन्ता– भावे ङीप् न भवति।
3 सम्पूर्णसूत्रस्यानुवृत्ति–इकोगुणवृद्धी1/1/3 इत्यस्य न धातुलोप आर्धधातुके 1/1/4

4 पृथक्स्थानीयानुवृत्ति–अष्टाध्याय्यां कानिचित् सूत्राणि ईदृशानि यस्य किंचिद् पदं यथानि–

र्दिष्टपदपर्यंतं तथा च किंचिद् पदं अन्यपदपर्यंतं गच्छति। यथा ईदूदेद्द्विवचनं प्रगृह्यम् 1/1/11 सूत्रस्य ईदूदेत् इत्यस्य अदसो मात् 1/1/12 पर्यंतं तथा च प्रगृह्यस्य इत्यस्य
ईदूतौ च सप्तम्यर्थे पर्यंतं चलति।
"अनुबध्नात्येनानुबन्धः" अनुबंधकरणार्थश्च वर्णानामुपदेशः [35] अनुबंधविषये प्राप्यते– एकान्ताः अनुबन्धाः [36] अनेकान्ताः तत्र अवयवत्वं स्वीकियते। तेन धातुषु आदित् ञिक्ष्विदा धातोः आदितश्च सूत्रेण इड्निषेधः भवति। प्रत्ययेषु कित्वात् कण्डूयति इत्यत्र क्ङित च सूत्रेण
गुणनिषेधः भवति। मिदागम प्रत्ययेषु मिदचोऽन्त्यात्परः 1/1/47 सूत्रं प्रवर्तते। विकरण
शप् इत्यस्य अपित्त्वात् सार्वधातुकमित् 1/1/4 सूत्रेण गुणवृद्धि'निषेधः भवति।
प्रत्याहारेषु प्रकृति प्रत्याहारे कृ भू अस् प्रत्यय प्रत्याहारेषु सुप् सुट् तिङ् तङ् तृन्
वर्णप्रत्याहारेषु अच् हल् प्रभृतीनां कृते सूत्राणि प्रयुज्यन्ते।
पूर्वत्रासिद्धम् पा सू 8/2/1 अष्टाध्याय्याः अन्यतमंसूत्रम् येन सपादसप्ताध्यायीं प्रति त्रिपा–
द्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् यथा लोपः शाकल्यस्य 8/3/19 त्रिपादी सूत्रं अतएव हर इह हरयिह इत्यत्र यकारलोपासिद्धंम्।
असिद्धवदत्राभात् [37] सूत्रेण इतःऊर्ध्वमापादसमाप्तेराभीयम् समानाश्रयो तस्मिन्कर्तव्ये
तदसिद्धम् तथा च हन् धातोः लोट्लकारे मध्यमपुरूषस्यैकवचने हन्+सिप् हन्+हि हन्+ज
इति जस्यासिद्धत्वान्न हेर्लुक
एतदनन्तरं सिद्धान्तकौमुदी आगता परं तत्र एतादृशं वैशिष्ट्यं नास्ति अत एव शेरवात्सकी महोदयेनोक्तम्–पाणिनीयं हि व्याकरणं मानवप्रतिभायाः सर्वोत्कृष्टरचनास्वन्यतमम्

**संदर्भ**


1 वाक्यपदीयम् ब्रह्मकाण्डम् 131
2 महाभाष्यम् आह्निक 1
3 यजुर्वेद 19/77
4 काव्यादर्श 1/34
5 महाभाष्यम् आ 1
6 ;ऋग्वेद 4/58/3
7 गोपथबगाह्मण 1/24
8 मैत्रायण संहिता 1/7/3
9 व्याकरणशास्त्रेतिहासः लोकमणिदाहाल पृ 20
10 वोपदेवः
11 व सुप्यापिशलेः पा अ 6/1/92
12 पा अ 1/2/25, 8/4/67
13 पा अ 7/3/99, 8/3/20, 8/4/67
14 पा अ 6/1/130
15 पा अ 7/2/63
16 पा अ 3/4/111, 8/3/18, 8/4/50
17 पा अ 1/1/16, 6/1/127, 8/3/19, 8/4/51
18 पा अ 5/4/112
19 पा अ 6/1/123
20 महाभाष्यम् 1/1/1
21 प अ 1/1/68
22 प अ 1/4/1
23 पा अ 7/3/67
24 पा अ 8/3/86
25 अष्टाध्यायीसूत्रपाठ पुष्पा दीक्षित पृ 2
26 Studies in Panini H P Dwivedi
27 पा अ 1/1/66
28 परिभाषेन्दुशेखर परि 12
29 परिभाषेन्दुशेखर परि 2
30 पा सू 6/3/34
31 तंत्रवार्तिक 1/234
32 अष्टा 4/1/120
33 अष्टा 6/1/73
34 परिभायोन्दुशेखर परि 38
35 महाभाष्यम् पश्पशाह्निकम्
36 परिभाषेन्दुशेखर परि 4–5
37 पा सू 6/4/22